...Public Instruction in Mysore

MIDDLE SCHOOL AND UPPER PRIMARY
EXAMINATION

THE SANSKRIT TEXT

1950, ~~and~~ 1951, and 1952 and 195

3,000 Copies

MYSORE:
PRINTED BY THE SENIOR ASST DIRECTOR AT THE GOVT. BRANCH PRESS
1949

Price : Re. 0-5-0

Dinvi

1–16. Harichandropākhyānam

206–78. — Harichandrotpattiḥ

250 Lines of Prose
Hitopadesa Standard.
200 Lines of Poetry

(ಕಂಠಪಾಠಕ್ಕೆ ಮಾತ್ರ)

सदुपदेशः

ಈ ಪದ್ಯಮಾಲಿಕೆಯನ್ನು ಶ್ರೀಮಚ್ಛಂಕರಭಗವತ್ಪಾದಾಚಾರ್ಯರ "ಭಜಗೋವಿನ್ದಮ್" ಸ್ತೋತ್ರಗಳಿಂದ ಆರಿಸಲಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಉತ್ತಮವಾದ ಕೆಲವು ಪದ್ಯಗಳು ಕಂಠಪಾಠವಾಗಿರಬೇಕೆಂಬುದೇ ಈ ಆಯ್ಕೆಯ ಉದ್ದೇಶ. ಅದರಿಂದ ಕಾಲಕ್ರಮದಲ್ಲಿ ಇವುಗಳ ಅರ್ಥವನ್ನು ತಿಳಿದು, ಜೀವನದ ಕಷ್ಟನಿಷ್ಠೂರಗಳಿಂದ ನೊಂದ ಮನಸ್ಸಿಗೆ ಶಾಂತಿಯನ್ನು ಪಡೆಯಲು ಸುಲಭವಾಗಬಹುದು. ಆದಕಾರಣ ಪ್ರತಿಯೊಬ್ಬ ವಿದ್ಯಾರ್ಥಿಯೂ ಈ ಮಾಲಿಕೆಯನ್ನು ಕಂಠದಲ್ಲಿ ಧರಿಸುವುದು ಅತ್ಯವಶ್ಯಕ.

To be learnt by heart.

Vide Mysore Gazette. 6-10-1949.

1) सदुपदेशः - whole P. 2.

3) सुभाषितवल्लरी - whole P. 4.

3) हरिश्चन्द्रोपाख्यानम्. Lines 103-130 on page P. 10

Reduction of portions for 1951. (T.B.C. Meeting of 9.6.1950.)

Page. 4. Slokas 9 and 10.
Page 6. Lines 1 to 16.
Page 14 to 17. Lines 206 - 280 inclusive } Harischandra Upakhyanam

सदुपदेशः

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥
(भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते)
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशस्सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २ ॥
भज गोविन्दं—
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥ ३ ॥
भज गोविन्दं—
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ४ ॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति, जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥ ५ ॥
अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ ६ ॥
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ ७ ॥
दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ ८ ॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयाऽपारे पाहि मुरारे ॥ ९ ॥
भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेऽपि न चर्चा ॥ १० ॥
कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनस्सर्वमतेन मुक्तो न भवति जन्मशतेन ॥ ११ ॥
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ॥ १२ ॥

सुभाषितवल्लरी

ಯಾವ ಉತ್ತಮ ಸಾಹಿತ್ಯವನ್ನೇ ಆಗಲಿ ಒಮ್ಮೆ ಓದಿ ಕೇಳಿದ ಮಾತ್ರದಿಂದಲೇ ಅದರ ಕೆಲವು ನೀತಿವಾಕ್ಯಗಳು ನಮ್ಮ ಹೃದಯದಲ್ಲಿ ಸ್ಥಿರವಾಗಿ ನೆಲಸಿ, ಮನಸ್ಸಿಗೆ ಶಾಂತಿಯನ್ನು ನೀಡುವುವು. ಈ ರೀತಿಯಾದ ಅಮರವಾಣಿಯನ್ನೇ ಸುಭಾಷಿತಗಳೆನ್ನುವರು. ಪ್ರಪಂಚದ ಅನುಭವಗಳಿಗೂ, ರಾಗಭಾವಗಳಿಗೂ, ಒಂದು ರೂಪುಗೊಟ್ಟು, ಮಾನವಹೃದಯದಲ್ಲೇಳುವ ಅನಂತಮುಖವಾದ ಆಶೆ, ಉತ್ಸಾಹ, ಸುಖ, ದುಃಖ—ಮೊದಲಾದವುಗಳಿಗೆ ಮರುದನಿಗೊಡುವಂತಹ ಈ ಸುಭಾಷಿತಗಳನ್ನು ಓದಿ ತಿಳಿಯದವನು ಮಾನವನೆನಿಸುವುದಿಲ್ಲ. ಆದುದರಿಂದ ಇಲ್ಲಿರುವ ಸುಭಾಷಿತಗಳ ಸಾರವನ್ನು ಸವಿದು, ಪ್ರತಿಯೊಬ್ಬ ಬಾಲಕನೂ ಅವುಗಳ ಉಪದೇಶಗಳನ್ನು ಅನುಸರಿಸುವುದಲ್ಲದೆ ಈ ರೀತಿಯಾದ ಸುಭಾಷಿತಗಳನ್ನು ಸಂಗ್ರಹಿಸಲು ತೊಡಗಬೇಕು.

सुभाषितवल्लरी

सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥ १ ॥
गुणैर्गौरवमायाति [1]नोच्चैरासनसंस्थितः ।
प्रासादशिखरारूढः काको न गरुडायते ॥ २ ॥
[2] अञ्जलिस्थानि पुष्पाणि [3] वासयन्ति करद्वयम् ।
अहो [4] सुमनसां प्रीतिर्वामदक्षिणयोः[5] समा ॥ ३ ॥
आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥ ४ ॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥ ५ ॥
देहीति वक्तुकामस्य यद्दुःखमुपजायते ।
दाता चेत्तद्विजानीयाद्दद्यात् [6]स्वपिशितान्यपि ॥ ६ ॥
खलः [7]सर्षपमात्राणि [8]परच्छिद्राणि पश्यति ।
आत्मनो [9]बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ ७ ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति [10]चाङ्गारः शीतः कृष्णायते करम् ॥ ८ ॥
प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
  शिरसि निहितभारा नारिकेला नराणाम् ।
उदकममृतकल्पं दद्युराजीवितान्तं
  न हि कृतमुपकारं साधवो विस्मरन्ति ॥ ९ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
  प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
  न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥ १० ॥

टिप्पणी

1 ಉನ್ನತಪೀಠದಲ್ಲಿ ಕುಳಿತಮಾತ್ರದಿಂದಲ್ಲ. 2 ಬೊಗಸೆಯಲ್ಲಿರುವ. 3 ಸುವಾಸನೆಗೊಳಿಸುವುವು. 4 ಹೂವುಗಳ, ವಿದ್ವಾಂಸರ. 5 ಎಡಬಲಗಳಲ್ಲಿ, ಅಧಮೋತ್ತಮರಲ್ಲಿ. 6 ತನ್ನ ಮಾಂಸವನ್ನಾದರೂ. 7 ಸಾಸಿವೆ ಕಾಳಿನಷ್ಟು. 8 ಮತ್ತೊಬ್ಬರ ದೋಷಗಳನ್ನು. 9 ಬಿಲ್ವಫಲದಷ್ಟು ದೊಡ್ಡದಾದ. 10 अङ्गारः—ಕೆಂಡ.

हरिश्चन्द्रोपाख्यानम्

ಭರತಖಂಡಕ್ಕೆ ಆದರ್ಶರಾಜನಾದ ಸತ್ಯಶೀಲ ಹರಿಶ್ಚಂದ್ರನ ಕಥೆಯನ್ನು ಮಾರ್ಕಂಡೇಯಪುರಾಣದ ಏಳು ಮತ್ತು ಎಂಟನೆಯ ಅಧ್ಯಾಯಗಳಿಂದಲೂ, ಇದರ ಉಪೋದ್ಘಾತವನ್ನು ಮಹಾಭಾರತದ ವನಪರ್ವದ ಎಪ್ಪತ್ತೇಳನೆಯ ಅಧ್ಯಾಯದಿಂದಲೂ ತೆಗೆದುಕೊಳ್ಳಲಾಗಿದೆ.

ಹರಿಶ್ಚಂದ್ರನ ಕಥೆಯು ನಮ್ಮಲ್ಲಿ ಯಾರಿಗೂ ಹೊಸದಲ್ಲ. ಆದರೂ ಆ ಕಥೆಯನ್ನು ಮತ್ತೆ ಮತ್ತೆ ಓದಿಕೇಳಲು ಯಾರಿಗೂ ಬೇಸರವಿಲ್ಲ. ಅದಕ್ಕೆ ಆ ಕಥಾವಸ್ತುವೂ, ಅದರ ಜೀವಾತುವಾದ ಕರುಣರಸವೂ ಕಾರಣವಾಗಿರುವುದು. ಆದುದರಿಂದ ಆ ಕಥೆಯನ್ನು ಬಾಲಕರಿಗೆ ಸಂಗ್ರಹವಾಗಿ ಸುಲಭಶೈಲಿಯಲ್ಲಿ ತಿಳಿಸಬೇಕೆಂಬುದನ್ನು ಮನಗಂಡು ಇದನ್ನು ಆರಿಸಲಾಗಿದೆ.

ವಸಿಷ್ಠವಿಶ್ವಾಮಿತ್ರರ ವಾದವು ಹರಿಶ್ಚಂದ್ರನನ್ನು ಅಯುಕ್ತವಾದ ದುರ್ದಶೆಗೀಡುಮಾಡಿತು. ಆದರೂ ಹರಿಶ್ಚಂದ್ರನು ಬಂದ ಕಷ್ಟಗಳನ್ನೆಲ್ಲಾ ಸಹನೆಯಿಂದ ಎದುರಿಸಿ ಸತ್ಯಪ್ರತಿಜ್ಞನೆನಿಸಿದನು. ತನ್ನ ಪ್ರತಿಜ್ಞಾವಚನವನ್ನು ಉಲ್ಲಂಘಿಸಿ ತನ್ನನ್ನೂ ತನ್ನ ಪ್ರಿಯಪತ್ನೀಪುತ್ರರನ್ನೂ ವಿಶ್ವಾಮಿತ್ರನ ತೀವ್ರಪರೀಕ್ಷೆಗಳಿಂದ ಪಾರುಮಾಡಿಕೊಳ್ಳಲು ಹರಿಶ್ಚಂದ್ರನು ಇಚ್ಛೆಪಡಲಿಲ್ಲ. ಅವನ ಪತ್ನಿಯಾದ ಚಂದ್ರಮತಿಯೂ (ಶೈಬ್ಯೆ) ಪತಿಯ ಚಿತ್ತಾನುವರ್ತಿನಿಯಾಗಿ, ಅವನ ಸತ್ಯಪರಿಪಾಲನೆಗೆ ಯಾವ ಅಡ್ಡಿ ಆತಂಕಗಳನ್ನೂ ತರದೆ ಪತಿವ್ರತಾಶಿರೋಮಣಿಯೆನಿಸಿದಳು. ಏನೂ ಅರಿಯದ ಹಸುಳೆಯಾದ ರೋಹಿತಾಕ್ಷನು ತಾಯಿಯನ್ನು ಅಗಲಿರಲಾರದೆ ಹಿಂಬಾಲಿಸಿ, ವೃದ್ಧಬ್ರಾಹ್ಮಣನ ಸೇವಕನಾದುದರ ಪರಿಣಾಮವಾಗಿ ಅಪಮೃತ್ಯುವಿಗೊಳಗಾದುದನ್ನು ಕೇಳಿದವರ ವಜ್ರಹೃದಯವೂ ಕರಗಿ ನೀರಾಗುವುದು. ಹರಿಶ್ಚಂದ್ರನು ರಾಜ್ಯಭ್ರಷ್ಟನಾಗಿ, ಬಂಧುಮಿತ್ರರನ್ನಗಲಿ, ಪತ್ನೀಪುತ್ರರನ್ನು ವಿಕ್ರಯಿಸಿ, ಚಂಡಾಲನ ಸೇವಕನಾಗಬೇಕಾಯಿತು. ಆದರೂ ಸತ್ಯಪರೀಕ್ಷೆಯಲ್ಲಿ ಉತ್ತೀರ್ಣನಾದುದರಿಂದ ದೇವರಾಜನು ಪ್ರತ್ಯಕ್ಷನಾಗಿ ಅವನಿಗೂ, ಅವನ ಪ್ರಜೆಗಳಿಗೂ ಸರ್ವಸುಲಭವಲ್ಲದ ಸ್ವರ್ಗವನ್ನು ಅನುಗ್ರಹಿಸಿದನು. ಶುಕ್ರಾಚಾರ್ಯರು ಹರಿಶ್ಚಂದ್ರನ ವಿಷಯವಾಗಿ 'ಹರಿಶ್ಚಂದ್ರಸಮೋ ರಾಜಾ ನ ಭೂತೋ ನ ಭವಿಷ್ಯತಿ' ಎಂದು ಹೇಳಿರುವುದು ಅಕ್ಷರಶಃ ಸತ್ಯವಾದುದು. ಹರಿಶ್ಚಂದ್ರನ ಸತ್ಯಪರಿಪಾಲನೆಯೂ, ಪ್ರಜಾವಾತ್ಸಲ್ಯವೂ ಸರ್ವರಿಗೂ ಅಚ್ಚಳಿಯದ ಆದರ್ಶವಾಗಿದೆ.

॥ श्रीः ॥

हरिश्चन्द्रोपाख्यानम्

उपोद्घातः

इक्ष्वाकूणां कुले जातो महात्मा पृथिवीपतिः ।
त्रिशङ्कुरिति विख्यातो राजराजो महाद्युतिः ॥
हरिश्चन्द्रस्ततो जज्ञे गुणरत्नाकरो नृपात् ।
सत्यवादी मधुरवाक्सत्येन बहुभाषिता ॥
उशीनरस्य राजर्षेर्दुहिता पुण्यलक्षणा ।
स्वयंवरे महाभागं वरयामास भामिनी ॥
हरिश्चन्द्रं समेतानां राज्ञां मध्ये पतिं विभुम् ।
तस्यां देव्यां हरिश्चन्द्राज्जज्ञे [1]राजीवलोचनः ॥
पुत्रः पुण्यवतां श्रेष्ठो लोहिताक्ष इति श्रुतः ।
एतस्मिन्नेव काले तु विश्वामित्रो दिवं गतः ।
आजगाम वासिष्ठोऽपि वामदेवसहायवान् ।
वर्ण्यमानेषु च तदा सत्यवादिषु राजसु ॥
तस्यां [2]संसदि सर्वस्माद्धरिश्चन्द्रोऽपि [3]पप्रथे ॥
हरिश्चन्द्रं प्रति तदा विश्वामित्रवसिष्ठयोः ।
पणः कृतस्तदा पश्चाद्विश्वामित्रेण पार्थिवः ॥
अवाप परमं दुःखं [4]मरणादमनोहरम् ॥

कथारम्भः

हरिश्चन्द्राख्यराजर्षिरासीत्त्रेतायुगे पुरा ।
स कदाचिन्महाबाहुररण्येऽनुसरन्मृगम् ।
शुश्राव शब्दमसकृ[5]त्त्रायस्वेति च योषिताम् ॥
स विहाय मृगं राजा मा भैषीरित्यभाषित ।
विश्वामित्रः [6]प्रागसिद्धा विद्याः साधयति व्रती ॥

साध्यमानाः क्षमामौनचित्तसंयमिनाऽमुना ।
ता वै भयार्ताः क्रन्दन्ति वयमस्य सुदुर्बलाः ॥
विश्वामित्रस्ततः क्रुद्धः श्रुत्वा तन्नृपतेर्वचः ।
स चापि राजा तं दृष्ट्वा प्रणिपत्याभ्यभाषत ॥
न क्रोद्धुमर्हसि मुने निजधर्मरतस्य मे ।
दातव्यं रक्षितव्यं च धर्मज्ञेन [7] महीक्षिता ॥

विश्वामित्रः—
यदि राजा भवान्सम्यग्राजधर्ममवेक्षते ।
[8]निर्वेष्टुकामो विप्रोऽहं दीयतामिष्टदक्षिणा ॥

राजा—
उच्यतां भगवान्यत्ते दातव्यमविशङ्कितम् ।
दत्तमित्येव तद्विद्धि यद्यपि स्यात्सुदुर्लभम् ॥

विश्वामित्रः—
राजन्प्रतिगृहीतोऽयं यस्ते दत्तः [9]प्रतिग्रहः ।
प्रयच्छ प्रथमं तावद्दक्षिणां राजसूयिकीम् ।

हरिश्चन्द्रः—
ब्रह्मंस्तामपि दास्यामि दक्षिणां भवतो ह्यहम् ।
व्रियतां द्विजशार्दूल यस्तवेष्टः प्रतिग्रहः ॥

विश्वामित्रः—
राज्यं च सकलं वीर कोशं यद्विद्यते तव ।
विना भार्यां च पुत्रं च शरीरं च प्रदीयताम् ॥
अविकारमुखः श्रुत्वा तथेत्याह कृताञ्जलिः ।

विश्वामित्रः—
यदि राजंस्त्वया दत्ता मम सर्वा वसुन्धरा ।
यत्र मे विषये स्वाम्यं तस्मान्निष्क्रान्तुमर्हसि ।
[10]श्रोणीसूत्रादिसकलं मुक्त्वा भूषणसंग्रहम् ।
तरुवल्कलमाबद्ध्य सह पत्न्या सुतेन च ॥
तथेति चोक्त्वा कृत्वा च राजा गन्तुं प्रचक्रमे ।
स्वपत्न्या शैब्यया सार्धं बालकेनात्मजेन च ॥

व्रजतः स ततो रुद्ध्वा पन्थानं प्राह तं नृपम् ।
क्व यास्यसीत्यदत्वा मे दक्षिणां राजसूयिकीम् ॥

हरिश्चन्द्रः—

भगवन् राज्यमेतत्ते दत्तं निहतकण्टकम् ।
अवशिष्टमिदं ब्रह्मन् अद्य देहत्रयं मम ॥

विश्वामित्रः—

तथाऽपि खलु दातव्या त्वया मे यज्ञदक्षिणा ।
यावत्तोषो राजसूये ब्राह्मणानां भवेन्नृप ।
तावदेव तु दातव्या दक्षिणा राजसूयिकी ॥

हरिश्चन्द्रः—

भगवन् साम्प्रतं नास्ति दास्ये कालक्रमेण ते ।
प्रसादं कुरु विप्रर्षे सद्भावमनुचिन्त्य च ॥

विश्वामित्रः—

किंप्रमाणो मया कालः प्रतीक्ष्यस्ते जनाधिप ॥

हरिश्चन्द्रः—

मासेन तव विप्रर्षे प्रदास्ये दक्षिणाधनम् ॥

विश्वामित्रः—

गच्छ गच्छ नृपश्रेष्ठ स्वधर्ममनुपालय ।
शिवश्च तेऽध्वा[11] भवतु मा सन्तु [12]परिपन्थिनः ।
अनुज्ञातः स गच्छेति जगाम वसुधाधिपः ।
पद्भ्यामनुचिता गन्तुमन्वगच्छत तं प्रिया ॥
तं सभार्यं नृपश्रेष्ठं निर्यान्तं ससुतं पुरात् ।
दृष्ट्वा प्रचुक्रुशुः पौराः राज्ञश्चैवानुयायिनः ॥

पौराः—

त्वं धर्मतत्परो राजन् पौरनुग्रहकृत्तथा ।
नयास्मानपि राजर्षे यदि धर्ममवेक्षसे ॥
यत्र त्वं तत्र हि वयं तत्सुखं यत्र वै भवान् ।
नगरं तद्भवान् यत्र स स्वर्गो यत्र नो नृपः ॥
इति पौरवचः श्रुत्वा राजा शोकपरिप्लुतः ।
अतिष्ठत्स तदा मार्गे तेषामेवानुकम्पया[13] ॥

विश्वामित्रोऽपि तं दृष्ट्वा पौरवाक्याकुलीकृतम् ।
रोषामर्षविवृत्ताक्षः समागम्य वचोऽब्रवीत् ॥
धिक्त्वां दुष्टसमाचारमनृतं [14]जिह्मभाषिणम् ।
मम राज्यं च दत्वा यः पुनः प्राक्कष्टुमिच्छसि ॥
इत्युक्तः परुषं तेन हरिश्चन्द्रो महीपतिः ।
गच्छामीत्याह दुःखार्तो नान्यत्किंचिदुदाहरत् ॥
स गत्वा वसुधापालो दिव्यां वाराणसीं पुरीम् ।
जगाम पद्भ्यां दुःखार्तः सह पत्न्याऽनुकूलया ॥
पुरीं प्रविष्टस्सोऽपश्यत् विश्वामित्रमुपस्थितम् ।
प्राह चैवाञ्जलिं कृत्वा हरिश्चन्द्रो महामुनिम् ।
इमे प्राणाः सुतश्चायमियं पत्नी मुने मम ।
यद्वान्यत्कार्यमस्माभिस्तदनुज्ञातुमर्हसि ॥

विश्वामित्रः—
पूर्णः स मासो राजर्षे दीयतां मम दक्षिणा ।
राजसूयनिमित्तं हि स्मर्यते स्ववचो यदि ॥

हरिश्चन्द्रः—
ब्रह्मन्नद्यैव संपूर्णो मासोऽम्लानतपोधन[15] ।
तिष्ठत्येतद्दिनार्धं यत्तत्प्रतीक्षस्व मा चिरम् ॥
एवमस्तु महाराज आगमिष्याम्यहं पुनः ।
इत्युक्त्वा प्रययौ विप्रो राजा चाचिन्तयत्तदा ॥
कथमस्मै प्रदास्यामि दक्षिणा या प्रतिश्रुता ।
कुतः [16]पुष्टानि मित्राणि कुतोऽर्थः सांप्रतं मम ॥
प्रतिग्रहः प्रदुष्टो मे नाहं यायामधः कथम् ।
अथवा [17] प्रेष्यतां यास्ये वरमेवात्मविक्रयः ॥
राजानं व्याकुलं दीनं चिन्तयानमधोमुखम् ।
प्रत्युवाच तदा पत्नी बाष्पगद्गदया गिरा ॥
त्यज चिन्तां महाराज स्वसत्यमनुपालय ॥
नातः परतरं धर्मं वदन्ति पुरुषस्य तु ।
यादृशं पुरुषव्याघ्र स्वसत्यपरिपालनम् ॥
राजन् जातमपत्यं मे सतां पुत्रफलाः स्त्रियः ।

स मां प्रदाय वित्तेन देहि विप्राय दक्षिणाम् ॥
एतद्वाक्यमुपश्रुत्य ययौ मोहं महीपतिः ।
प्रतिलभ्य च संज्ञां स विललापातिदुःखितः ॥
हा हा कथं त्वया शक्यं वक्तुमेतच्छुचिस्मिते ।
दुर्वाच्यमेतद्वचनं कर्तुं शक्नोम्यहं कथम् ॥
एतस्मिन्नन्तरे प्राप्तो विश्वामित्रो महातपाः ।
[18]कल्पकाल इव क्रुद्धो राजानमिदमब्रवीत् ॥

विश्वामित्रः—

दीयतां दक्षिणा सा मे यदि धर्ममवेक्षसे ।
सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी ।
सत्यं चोक्तं परो धर्मः स्वर्गः सत्ये प्रतिष्ठितः ॥
अद्य मे दक्षिणां राजन् न दास्यति भवान् यदि ।
अस्ताचलं प्रयातेऽर्के शप्स्यामि त्वां ततो ध्रुवम् ।
इत्युक्त्वा स ययौ विप्रो राजा चासीद्भयातुरः ॥
भार्याऽस्य भूयः प्राहेदं क्रियतां वचनं मम ॥
स तया [19]चोद्यमानस्तु राजा पत्न्या पुनः पुनः ।
प्राह भद्रे करोम्येष विक्रयं तव निर्घृणः ।
[20]नृशंसैरपि यत्कर्तुं न शक्यं तत्करोम्यहम् ॥
एवमुक्त्वा ततो भार्यां गत्वा नगरमातुरः ।
बाष्पापिहितकण्ठाक्षस्ततो वचनमब्रवीत् ॥
भो भो नागरिकाः सर्वे शृणुध्वं वचनं मम ।
किं मां पृच्छत कस्त्वं भो नृशंसोऽहममानुषः ॥
विक्रेतुं दयितां प्राप्तो यो न प्राणांस्त्यजाम्यहम् ।
यदि वः कस्यचित्कार्यं दास्या प्राणेष्टया मम ॥
स ब्रवीतु त्वरायुक्तो यावत्संधारयाम्यहम् ॥
अथ वृद्धो द्विजः कश्चिदागत्याह नराधिपम् ।
समर्पयस्व मे दासीमहं क्रेता [21] धनप्रदः ॥
अस्ति मे वित्तमस्तोकं[22] सुकुमारी च मे प्रिया ।
गृहकर्म न शक्नोति कर्तुमस्मात्प्रयच्छ मे ॥
एवमुक्तस्य विप्रेण हरिश्चन्द्रस्य भूपतेः ।
व्यदीर्यत मनो दुःखान्न चैनं किंचिदब्रवीत् ॥

ततो विप्रो धनं[23] बद्ध्वा नृपपत्नीमकर्षयत् ॥
रुरोद रोहिताक्षोऽपि दृष्ट्वा कृष्टां तु मातरम् ।
समभ्यधावदम्बेति रुदन्नस्राविलेक्षणः ॥
तमागतं द्विजः क्रोधाद्बालमभ्याहन[24]त्पदा ।
वदंस्तथाऽपि सोऽम्बेति नैवामुञ्चत मातरम् ॥

राजपत्नी—

प्रसादं कुरु मे नाथ क्रीणीष्वेमं च बालकम् ।
क्रीताऽपि नाहं भवतो विनैनं कार्यसाधिका ॥
इत्थं ममाल्पभाग्यायाः प्रसादसुमुखो भव ।
मां संयोजय बालेन वत्सेनेव [25]पयस्विनीम् ॥
तथैव तस्य तद्वित्तं बद्ध्वोत्तरपटे ततः ।
प्रगृह्य [26] बालकं मात्रा सहैकस्थमबन्धयत् ॥
नीयमानौ तु तौ दृष्ट्वा भार्यापुत्रौ स पार्थिवः ।
विललाप सुदुःखार्तो निःश्वस्योष्णं पुनः पुनः ॥
यां न वायुर्न चादित्यो नेन्दुर्न च [2] पृथग्जनः ।
दृष्टवन्तः पुरा पत्नी सेयं दासीत्वमागता ॥
सूर्यवंशप्रसूतोऽयं सुकुमारकराङ्गुलिः ।
संप्राप्तो विक्रयं बालो धिङ्मामस्तु सुदुर्मतिम् ॥
एवं विलपतो राज्ञः स विप्रोऽन्तरधीयत ।
विश्वामित्रस्ततः प्राप्तो नृपं वित्तमयाचत ॥
तस्मै समर्पयामास हरिश्चन्द्रोऽपि तद्धनम् ॥
तद्वित्तं स्तोकमालोक्य दारविक्रयसंभवम् ।
शोकाभिभूतं राजानं कुपितः कौशिकोऽब्रवीत् ।

विश्वामित्रः—

[28]क्षत्रबन्धो ममेमां त्वं सदृशीं यज्ञदक्षिणाम् ।
मन्यसे यदि तत्क्षिप्रं पश्य त्वं मे बलं परम् ॥

राजा—

अन्यां दास्यामि भगवन् कालः कश्चित्प्रतीक्ष्यताम् ।
सांप्रतं नास्ति विक्रीता पत्नी पुत्रश्च बालकः ॥

विश्वामित्रः—

चतुर्भागः स्थितो योऽयं दिवसस्य नराधिप।
एष एव प्रतीक्ष्यो मे वक्तव्यं नोत्तरं त्वया।
एवमुक्त्वाऽऽदाय धनं कुपितः कौशिको ययौ।
विश्वामित्रे गते राजा भयशोकादिमध्यगः।
स्वविक्रयं विनिश्चित्य प्रोवाचोच्चैरधोमुखः॥
वित्तक्रीतेन यो ह्यर्थी मया प्रेष्येण[29] मानवः।
स ब्रवीतु त्वरायुक्तो यावत्तपति भास्करः॥
अथाजगाम त्वरितो धर्मश्चण्डालरूपधृक्।

चण्डालः—

अहमर्थी त्वया शीघ्रं कथयस्वात्मवेतनम्[30]॥
तं तादृशमथालक्ष्य कस्त्वमित्याह पार्थिवः॥

चण्डालः—

चण्डालोऽहमिह ख्यातः प्रवीराख्यः पुरोत्तमे।
विख्यातो वध्यवधको मृतकम्बलहारकः॥
तस्यैवं वदतः प्राप्तो विश्वामित्रस्तपोनिधिः।
कोपामर्षविवृत्ताक्षः प्राह चेदं नराधिपम्॥
चण्डालोऽयमनल्पं ते दातुं वित्तमुपस्थितः।
कस्मान्न दीयते मह्यमशेषा यज्ञदक्षिणा॥

हरिश्चन्द्रः—

भगवन् सूर्यवंशोत्थमात्मानं वेद्मि कौशिक।
कथं चण्डालदासत्वं गमिष्ये वित्तकामुकः।
भवेयं वित्तशेषेण सर्वकर्मकरो वशः।
तवैव मुनिशार्दूल प्रेष्यश्चित्तानुवर्तकः॥

विश्वामित्रः—

यदि प्रेष्यो मम भवांश्चण्डालाय ततो मया।
दासभावमनुप्राप्तो दत्तो वित्तार्बुदेन वै॥

हरिश्चन्द्रः—

यद्यसौ शक्यते विप्रः कौशिकः परितोषितुम्।

ततो गृहाण मामद्य दासत्वं ते करोम्यहम् ॥
एवमुक्ते तदा तेन [31]श्वपाको हृष्टमानसः ।
विश्वामित्राय तद्द्रव्यं दत्वा बद्ध्वा नरेश्वरम् ।
इष्टबन्धुवियोगार्तमानयन्निजपक्कणम्[32] ॥
राज्यनाशः सुहृत्त्यागो भार्यातनयविक्रयः ।
प्राप्ता चण्डालता चेयमहो दुःखपरम्परा ॥
हरिश्चन्द्रोऽभवद्राजा श्मशाने तद्वशानुगः ।
चण्डालेनानुशिष्टश्च[33] मृतचेलापहारिणा ॥
शवागमनमन्विच्छन्निह[34] तिष्ठन्दिवा निशम् ।
इदं राज्ञेऽपि देयं च षड्भागं तु शवं प्रति ॥
त्रयस्तु मम भागाः स्युर्द्वौ भागौ तव वेतनम् ।
इति प्रतिसमादिष्टो जगाम शवमन्दिरम् ।
दिशं तु दक्षिणां यत्र वाराणस्यां स्थितं तदा ॥
इदं मम इदं राज्ञे मुख्यचण्डालके त्विदम् ।
इति धावन्दिशो राजा जीवन् [35] योन्यन्तरं गतः ॥
न रात्रौ न दिवा शेते हाहेति प्रवदन्मुहुः ।
एवं द्वादशमासास्तु नीताः शतसमोपमाः ॥
अथाजगाम स्वसुतं मृतमादाय [36] लापिनी ।
भार्या तस्य नरेन्द्रस्य सर्पदष्टं हि बालकम् ॥
तस्या विलापशब्दं तमाकर्ण्य स नराधिपः ।
जगाम त्वरितोऽत्रेति भविता मृतकम्बलः ॥
स तां च रुदतीं भार्यां नाभ्यजानात्तु पार्थिवः ।
चिरप्रवाससन्तप्तां पुनर्जातामिवाबलाम् ॥
सापि तं चारुकेशान्तं पुरा दृष्ट्वा जटालकम् ।
नाभ्यजानान्नृपसुता शुष्कवृक्षोपमं नृपम् ॥
सोऽपि कृष्णपटे बालं दृष्ट्वाशीविषपीडितम्[37] ॥
[38]नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः ॥
एनं दृष्ट्वा हि मे बालं मातुरुत्सङ्गशायिनम्[39] ।
स्मृतिमभ्यागतो बालो रोहिताक्षोऽब्जलोचनः ॥
सोऽप्येतामेव मे वत्सो वयोऽवस्थामुपागतः ।
नीतो यदि न घोरेण कृतान्तेनात्मनो वशम् ॥

राजपत्नी—

हा वत्स कस्य पापस्य [40]अपध्यानादिदं महत् ।
दुःखमापतितं घोरं यस्यान्तो नोऽपलक्ष्यते ॥
हा नाथ राजन् भवता मामनाश्वास्य दुःखिताम् ।
क्वापि संतिष्ठता स्थाने [41] विश्रब्धं स्थीयते कथम् ॥
इति तस्या वचः श्रुत्वा राजा स्वस्थानतश्च्युतः ।
[42]प्रत्यभिज्ञाय दयितां पुत्रं च निधनं गतम् ॥
कष्टं शैव्येयमेषा हि स बालोऽयमितीरयन् ।
रुरोद दुःखसन्तप्तो मूर्छामभिजगाम च ॥
सा च तं प्रत्यभिज्ञाय तामवस्थामुपागतम् ।
मूर्छिता निपपातार्ता निश्चेष्टा धरणीतले ॥
चेतः संप्राप्य राजेन्द्रो राजपत्नी च तौ समम् ।
विलेपतुः सुसन्तप्तौ शोकभारातिपीडितौ ॥

राजपत्नी—

राजन् स्वप्नोऽथ [43] तथ्यं वा यदेतन्मन्यते भवान् ।
तत्कथ्यतां महाभाग मनो वै मुह्यते मम ॥
इति तस्या वचः श्रुत्वा निश्वस्योष्णं सगद्गदम् ।
कथयामास तन्वङ्ग्या यथा प्राप्ता श्वपाकता ॥
साऽपि स्वपुत्रमरणं यथावृत्तं न्यवेदयत् ।

राजा—

यमस्य भिक्षां याचावः कृपणौ पुत्रगर्धिनौ ।
तस्माच्छीघ्रं व्रजावोऽद्य पुत्रो यत्र प्रियो गतः ॥
प्रिये न रोचये दीर्घं कालं क्लेशमुपासितम् ।
[44]नात्मायत्तश्च तन्वङ्गि पश्य मे मन्दभाग्यताम् ॥
चण्डालेनाननुज्ञातः प्रवेक्ष्ये ज्वलनं यदि ।
चण्डालदास्यतां यास्ये पुनरप्यन्यजन्मनि ॥
अनुज्ञाता च गच्छ त्वं विप्रवेश्म शुचिस्मिते ।
मम वाक्यं च तन्वङ्गि निबोधादृतमानसा ॥
यदि दत्तं यदि हुतं गुरवो यदि तोषिताः ।
परत्र सङ्गमो भूयात्पुत्रेण सह च त्वया ॥

राजपत्नी—

अहमप्यत्र राजर्षे दीप्यमाने हुताशने ।
दुःखभारासहाऽद्यैव सह यास्यामि वै त्वया ॥
श्रुत्वा राजा तदोवाच एवमस्तु पतिव्रते ॥
ततः कृत्वा चितां राजा आरोप्य तनयं स्वकम् ।
भार्यया सहितश्चासौ बद्धाञ्जलिपुटस्तदा ।
परमात्मानमीशं च नारायणमचिन्तयत् ॥
तस्य चिन्तयमानस्य सर्वे देवाः सवासवाः ।
धर्मं प्रमुखतः कृत्वा समाजग्मुस्त्वरान्विताः ॥
आगत्य सर्वे प्रोचुस्ते भो भो राजन् शृणु प्रभो ।
अयं पितामहः साक्षाद्धर्मश्च भगवान्स्वयम् ।
एते चान्ये च बहवो विश्वामित्रस्तथैव च ॥

धर्मः—

मा राजन्साहसं कार्षीः धर्मोऽहं त्वामुपागतः ।
[45]तितिक्षादमसत्याद्यैः स्वगुणैः परितोषितः ॥

इन्द्रः—

हरिश्चन्द्र महाभाग प्राप्तः शक्रोऽस्मि तेन्तिकम् ।
त्वया सभार्यपुत्रेण जिता लोकाः सनातनाः ॥
ततोऽमृतमयं वर्षमपमृत्युविनाशनम् ।
इन्द्रः प्रासृजदाकाशाच्चितास्थानगतः प्रभुः ॥
समुत्तस्थौ ततः पुत्रो राज्ञस्तस्य महात्मनः ।
ततो राजा हरिश्चन्द्रः परिष्वज्य सुतं क्षणात् ॥
सभार्यः सुश्रिया युक्तो दिव्यमाल्याम्बरान्वितः ॥

इन्द्रः—

सभार्यस्त्वं सपुत्रश्च प्राप्स्यसे सद्गतिं पराम् ।
खमारोह महाभाग निजानां कर्मणां फलैः ॥

हरिश्चन्द्रः—

देवराजाननुज्ञातः स्वामिना श्वपचेन वै ।
अगत्वा [46] निष्कृतिं तस्य नारोक्ष्येऽहं सुरालयम् ॥

 Y. Omit for 1951

धर्मः—

तवैव भाविनं क्लेशमवगम्यात्ममायया ।
आत्मा श्वपाकतां नीतो दर्शितं तच्च चापलम् ॥

इन्द्रः—

प्राप्यते यत्परं स्थानं समस्तैर्मनुजैर्भुवि ।
तदारोह हरिश्चन्द्र स्थानं पुण्यकृतां नृणाम् ॥

हरिश्चन्द्रः—

देवराज नमस्तुभ्यं वाक्यं चैतन्निबोध मे ।
मच्छोकमग्नमनसः कोसले नगरे जनाः ॥
तिष्ठन्ति तानपोह्याद्य[47] कथं यास्याम्यहं दिवम् ॥
यदि ते सहिताः स्वर्गं मया यान्ति सुरेश्वर ।
ततोऽहमपि यास्यामि नरकं वाऽपि तैः सह ॥

इन्द्रः—

बहूनि पुण्यपापानि तेषां भिन्नानि वै [48]पृथक् ।
कथं [49]सङ्घातभोग्यं त्वं भूयः स्वर्गमवाप्स्यसि ॥

हरिश्चन्द्रः—

शक्र तेषां प्रभावेन मया सर्वमनुष्ठितम् ।
उपकर्तॄन् न [50] सन्त्यक्षे तानहं [51]स्वर्गलिप्सया ॥
तस्माद्यन्मम देवेश किञ्चिदस्ति सुचेष्टितम् ।
दत्तमिष्टमथो जप्तं सामान्यं तैस्तदस्तु नः ॥
एवं भविष्यतीत्युक्त्वा शक्रस्त्रिभुवनेश्वरः ।
प्रसन्नचेता धर्मश्च विश्वामित्रश्च गाधिजः ॥
गत्वाऽऽशु नगरं सर्वान् प्रोवाच विबुधाधिपः ।
आगच्छन्तु जनाः शीघ्रं स्वर्गलोकं सुदुर्लभम् ॥
तदिन्द्रस्य वचः श्रुत्वा प्रीत्या तस्य च भूपतेः ।
राज्ञा सह तदा सर्वे दिवमारुरुहुर्जनाः ॥
ततस्तस्यार्द्धिमालोक्य श्लोकं तस्योशना[52] जगौ ।
हरिश्चन्द्रसमो राजा न भूतो न भविष्यति ॥

टिप्पणी

हरिश्चन्द्रोपाख्यानम्

1. राजीवलोचनः—ತಾವರೆಯಂತೆ ಕಣ್ಣುಳ್ಳವನು. 2. संसदि—ಸಭೆಯಲ್ಲಿ 3. पप्रथे—ಪ್ರಖ್ಯಾತನಾದನು. 4. अमनोहरम्—ಉತ್ತಮವಲ್ಲದ. 5. असकृत्—ಬಾರಿಬಾರಿಗೂ (ಅವ್ಯಯಂ). 6. प्रागसिद्धाः—ಅದುವರೆವಿಗೂ ಕೈಗೂಡದಿರುವ. 7. महीक्षिता—ರಾಜನಿಂದ. 8. निर्वेष्टुकामः—ವಿವಾಹವನ್ನು ಬಯಸುವ. 9. प्रतिग्रहः—ದಾನ. 10. श्रोणीसूत्रम्—ಉಡಿದಾರ. 11. अध्वा—ದಾರಿ (ನ. ಪು.) 12. परिपन्थिनः—ಶತ್ರುಗಳು. 13. अनुकम्पा—ದಯೆ. 14. जिह्मभाषी—ವಕ್ರನುಡಿಯಾಡುವವನು. 15. अम्लानतपोधन ?—ಸ್ಥಿರ ತಪಸ್ಸುಳ್ಳವನೇ? 16. पुष्टानि—ಸಮೃದ್ಧರಾದ 17. प्रेष्यताम्—ಸೇವಕತನವನ್ನು. 18. कल्पकाल इव—ಪ್ರಳಯಕಾಲದ ಯಮನಂತೆ. 19. चोद्यमानः—ಪ್ರೇರಿಸಲ್ಪಟ್ಟು. 20. नृशंसः—ಕ್ರೂರಿ. 21. क्रेता—ಕೊಂಡುಕೊಳ್ಳುವವನು. 22. अस्तोकम्—ವಿಶೇಷವಾಗಿ (ಅವ್ಯಯಂ). 23. धनं बद्ध्वा—ಹಣವನ್ನು ಕಟ್ಟಿ. 24. अभ्याहनत्—ಒದ್ದನು. 25. पयस्विनी—ಹಾಲುಕರೆಯುವ ಹಸು. 26. प्रगृह्य—ಹಿಡಿತಂದು (ಅವ್ಯಯಂ). 27. पृथग्जनः—ಸಾಮಾನ್ಯ ಮನುಜ. 28. क्षत्रबंधो—ನೀಚಕ್ಷತ್ರಿಯನೇ ? 29. प्रेष्येण—ಸೇವಕನಿಂದ. 30. आत्मवेतनम्—ನಿನ್ನ ಬೆಲೆಯನ್ನು. 31. श्वपाकः—ಚಂಡಾಲ. 32. पक्कणम्—ಹೊಲಗೇರಿ. 33. अनुशिष्टः—ನಿಯಮಿತನಾಗಿ. 34. अन्विच्छन्—ನಿರೀಕ್ಷಿಸುತ್ತ. 35. योन्यन्तरं गतः—ಜನ್ಮಾಂತರವನ್ನು ಪಡೆದನು. 36. लापिनी—ಅಳುತ್ತಿರುವ. 37. आशीविषः—ಹಾವು. 38. नरेन्द्रः—ವಿಷವೈದ್ಯ, ರಾಜ. 39. उत्सङ्गः—ತೊಡೆ. 40. अपध्यानम्—ಕೆಟ್ಟ ಯೋಚನೆ. 41. विश्रब्धम्—ನಿಶ್ಚಿಂತೆಯಾಗಿ. 42. प्रत्यभिज्ञाय—ಗುರುತಿಸಿ. 43. तथ्यम्—ನಿಜ. 44. आयत्तः—ಅಧೀನ. 45. तितिक्षा—ಸಹನೆ. 46. निष्कृतिम्—ಋಣಮುಕ್ತಿಯನ್ನು. 47. अपोह्य—ಬಿಟ್ಟು (ಅವ್ಯಯಂ). 48. पृथक्—ಬೇರೆ (ಅವ್ಯಯಂ). 49. सङ्घातभोग्यम्—ಒಟ್ಟಾಗಿ ಭೋಗಪಡಲು ಅರ್ಹವಾದ. 50. न सन्त्यक्षे—ಬಿಡುವುದಿಲ್ಲ. 51. लिप्सा—ಆಶೆ. 52. उशनाः—ಶುಕ್ರಾಚಾರ್ಯ.

ಉಪಾಧ್ಯಾಯರಿಗೆ ಸೂಚನೆ

ಇಲ್ಲಿ ಸಂಗ್ರಹಿಸಿರುವ ಕಥೆಗಳಲ್ಲಿ 'ಭೀಷ್ಮಪ್ರತಿಜ್ಞೆ' ಮತ್ತು 'ಶಿಬಿಚರಿತೆ' ಯನ್ನು ಮಹಾಭಾರತದಿಂದಲೂ 'ವೀರವರಸ್ಯ ಕಥಾ' ಮತ್ತು 'ಪರಿಹಾಸ ಶೀಲಃ ಚೋರಃ' ಎಂಬೆರಡು ಕಥೆಗಳನ್ನು ಕಥಾಸರಿತ್ಸಾಗರದಿಂದಲೂ ಆಯ್ದು ಕೊಳ್ಳಲಾಗಿದೆ. ಸಂಸ್ಕೃತಭಾಷೆಯು ಸಮಾಸಪದಭೂಯಿಷ್ಠವೂ, ಅತ್ಯಂತ ಜಟಿಲವೂ ಆದುದೆಂದು ತಿಳಿದಿರುವ ಬಾಲಕರ ಪಠನ ಸೌಕರ್ಯಕ್ಕಾಗಿ 'ವಾಕ್ಯೆ ತು ಸಾ ವಿವಕ್ಷಾಮಪೇಕ್ಷತೆ' ಎಂಬ ಪಕ್ಷವನ್ನವಲಂಬಿಸಿ ಪದಗಳನ್ನು ಸಾಧ್ಯವಾದಷ್ಟು ಬಿಡಿಸಿ ಬರೆಯಲಾಗಿದೆ. ಅಲ್ಲದೆ ಬಾಲಕರು ಸುಲಭವಾಗಿ ಗ್ರಹಿಸಬಹುದಾದ ವೀರರಸ ಮತ್ತು ಹಾಸ್ಯರಸದ ಕಥಾಭಾಗವನ್ನೇ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಬಾಲಕರು ಈ ಕಥೆಗಳ ನೀತಿಯನ್ನು ತಿಳಿಯುವುದಲ್ಲದೆ, ಬಿಡಿಸಿ ಬರೆದಿರುವ ಪದಗಳನ್ನು ಸಂಧಿಮಾಡಿ ಆವಶ್ಯಕವಾದ ವ್ಯಾಕರಣ ನಿಯಮಗಳನ್ನು ಅರಿತುಕೊಳ್ಳಲು ಉಪಾಧ್ಯಾಯರು ಮಾರ್ಗದರ್ಶಕರಾಗುವರೆಂದು ನಿರೀಕ್ಷಿಸಲಾಗಿದೆ.

भीष्मप्रतिज्ञा

पुरा किल भरतवर्षे शन्तनुर्नाम राजा बभूव। तस्य गङ्गायां भीष्मापरनामधेयः देवव्रतो नाम पुत्रः समुत्पन्नः। एकदा शन्तनुः यमुनां नदीं अभितः वर्तमानं वनं गतः अलौकिकं गन्धं अजिघ्रत्। तस्य प्रभवं [1]जिज्ञासमानः समन्ततः अन्विष्य कञ्चिद्देवरूपिणीं दाश[2]कन्यां अपश्यत्। 'कस्य त्वमसि, काऽसि, किं करोषि' इति च तां अपृच्छत्। सा अब्रवीत्। दाशराजस्य मम पितुः नियोगात् धर्मार्थं [3]तरीं वाहये इति। रूपमाधुर्यगन्धैः संयुक्तां तां दाशकन्यां समीक्ष्य राजा अकामयत। यदा शन्तनुः तस्याः पितरं दाशराजं गत्वा तां आत्मार्थं वरयामास तदा दाशराजः तं प्रति उवाच। 'राजन्, त्वत्समः न कोऽपि वरः भविष्यति। यदि इमां मदीयां कन्यां त्वं प्रार्थयसे तर्हि तां तुभ्यं [4]समयेन प्रदद्यां' इति। शन्तनुः उवाच 'समयं तावत् कथय' इति। दाशराजः प्रत्यभाषत 'अस्यां यः पुत्रो जायेत स एव त्वदनन्तरं राज्ये अभिषेक्तव्यः नान्यः कश्चन इति समयः कर्तव्यः' इति। पुत्रप्रेम्णा शन्तनुः एतं वरं दातुं नैच्छत्। केवलं दाशकन्यां एव स्मरन् हास्तिनपुरं प्रति न्यवर्तत॥

ततः चिन्तापरं पितरं दृष्ट्वा देवव्रतः अब्रवीत्। 'तात, भवतः सर्वतः कल्याणं वर्तते, सर्वे च पार्थिवाः वशं गताः, तत् किमर्थं दुःखितः भवसि, तव [5]आधिं ज्ञातुं इच्छामि, ज्ञात्वा च प्रतिकुर्याम्' इति। एवं प्रियेण पुत्रेण आश्वासितः अपि शन्तनुः दाशकन्यागतं स्वकीयं अनुरागं आविष्कर्तुं न अशक्नोत्। उवाच च। 'असंशयं अहं चिन्तापरः। अस्माकं महति कुले त्वमेव एकः [6]अपत्यम्। कथञ्चित् तव विपत्तौ सर्वमेव कुलं नाशं व्रजेत्। 'एकपुत्रत्वं [7]अनपत्यतैव' इति धर्मवादिनः वदन्ति। 'त्वं शूरः सर्वदा युद्धरतः च। एतदेव मम दुःखस्य कारणं' इति। महाबुद्धिः भीष्मः एतत्पितुः वचनं श्रुत्वा पितुः सूतं आहूय तमुवाच। 'सूत, त्वं मम सखा असि, अपि जानासि कस्यां नृपतिः बद्धभावः'

इति । सूतः प्रत्युवाच । 'दाशकन्यायां बद्धानुरागेण भूपेन यदा दाशराजः प्रार्थितः तदा सः अब्रवीत् 'यः पुत्रः अस्यां जायेत सः त्वदनन्तरं राजा भवतु' इति । शन्तनुः त्वां अवेक्ष्य दाशराजस्य वचनमिदं न [8]अन्वमन्यत' इति ।

ततो भीष्मः पितुः मानसं सम्यक् [9]विज्ञाय यमुनां प्रययौ । पितुः कृते दाशराजं कन्यां अयाचत । दाशराजः तं विधिवत् प्रतिपूज्य अब्रवीत् । "को नाम ईदृशं श्लाघ्यं संबन्धं नेच्छेत् । मया तव पिता उक्तः 'अस्यां कन्यायां यः पुत्रः जायेत सः तवानन्तरं राजा अस्तु' इति । दोषं च अत्र एकं पश्यामि । यः पुत्रः मम कन्यायां जायेत तस्य त्वं [10]सपत्नः भविष्यसि । यस्य यस्य गन्धर्वस्य असुरस्य वा त्वं सपत्नः भवेः स स न चिरं जीवेत् । एतावानेव अत्र दोषः नान्यः कश्चन विद्यते । त्वमेव अत्र विचारय" इति ॥

एवमुक्तः गाङ्गेयः भूमिपालानां समक्षं दाशं अभाषत । 'तव वचनं करिष्यामि । तव कन्यायां यः पुत्रः जायेत सः नः राजा भविष्यति' इति । दाशः प्रत्यवदत् । 'सत्यधर्मपरायण भीष्म, यत्त्वया राजमध्ये पितुः कृते प्रतिज्ञातं तत्तव अनुरूपमेव । तव वचनं न कदापि अन्यथा भवेत् । यस्तु तव पुत्रो भवेत् [11]तमन्तरेण महान् मे संशयः' इति । दाशराजस्य वचः श्रुत्वा पितुः प्रियं कर्तुमिच्छन् गाङ्गेयः उवाच । 'दाशराज, सर्वेषां भूमिपालानां अग्रे यदहं ब्रवीमि तत् निबोध । मया राज्यं तावत् पूर्वमेव त्यक्तम् । मम पुत्रं उद्दिश्य यस्मात् ते महान् संशयः जायते तस्मात् अद्य प्रभृति अहं आमरणं ब्रह्मचारी भविष्यामि । अपुत्रस्यापि मे अक्षयाः लोकाः भविष्यन्ति । अधुना मम पित्रे कन्यां प्रयच्छ' इति ॥

इदं भीष्मस्य दुष्करं वचनं श्रुत्वा दाशराजः 'कन्यां ददामि' इति प्रत्यभाषत । अन्तरिक्षाच्च देवाप्सरोभिः कुसुमवृष्टिः पातिता । ततः भीष्मः दाशकन्यां सत्यवतीं उवाच । 'मातः रथं अधिरोह, स्वगृहान् गच्छावः' इति । तां रथं आरोप्य हास्तिनपुरं आगम्य भीष्मः शन्तनवे न्यवेदयत् । भीष्मेण पितृभक्त्या कृतं दुष्करं कर्म श्रुत्वा शन्तनुः भृशं दुःखितः बभूव । तेन कर्मणा तुष्टः भीष्माय '[12]स्वच्छन्दमरणो भव' इति वरं ददौ ॥

टिप्पणी

भीष्मप्रतिज्ञा

1. जिज्ञासमानः—ತಿಳಿಯಬೇಕೆಂದು. 2. दाशकन्याम् —ಬೆಸ್ತರ ಹುಡುಗಿಯನ್ನು. 3. तरीम् —ದೋಣಿಯನ್ನು. 4. समयेन—ಷರತ್ತಿನಿಂದ. 5. आधिम् —ಮನೋವ್ಯಥೆಯನ್ನು. 6. अपत्यम् —ಮಗು (ಸಂತಾನ). 7. अनपत्यता—ಮಕ್ಕಳಿಲ್ಲದಿರುವಿಕೆ. 8. नान्वमन्यत—ಒಪ್ಪಲಿಲ್ಲ. 9. विज्ञाय—ತಿಳಿದು. 10. सपत्नः—ಶತ್ರು. 11. तमन्तरेण—ಅವನನ್ನು ಕುರಿತು. 12. स्वच्छन्दमरणः—ಇಚ್ಛೆಬಂದಾಗ ಸಾಯುವವನು.

शिबिचरितम्

एकदा [1] श्येनेन [2] अनुस्रियमाणः प्रियदर्शनः कपोतः शिबिं नाम राजेन्द्रं शरणमगच्छत्। स महात्मा त्रासात् अङ्कमुपागतं तं दृष्ट्वा अवदत्। 'वत्स, [3]आश्वसिहि सुमहदेतद्भयं तव कस्मात् सञ्जातम्। त्वया कुत्र किं कृतं येन त्वं भ्रान्तचेतनः इह संप्राप्तः? मा [4]बिभीहि। मत्सकाशं[5] अनुप्राप्तं त्वां न कश्चिदपि ग्रहीतुं शक्नुयात्। त्वदर्थं काशिराज्यं मम जीवितमपि त्यजेयम्। तस्मात् [6]विस्रब्धो भव। न ते किञ्चन भयं विद्यते'। इति॥

तदा श्येनः आगत्य राजानं उवाच। 'राजन्, मम आहारभूतं एनं न त्वं त्रातुमर्हसि। तृष्णा [7] मां बाधते [8] क्षुधा च मां निर्दहति। तस्मात् एनं मुञ्च। यदि त्वं धर्मार्थी शरणागतं कपोतं रक्षसि तर्हि क्षुधार्तं मामपि [9] तर्पयितुमर्हसि' इति। राजा प्रत्युवाच। 'क्षुधाप्रशमाय त्वदर्थं वराहं वा महिषं वा मृगं वा [10]उपकल्पयामि। शरणागतं न त्यजेयमिति मे व्रतम्। पश्य अयं कपोतः भयात् ममाङ्कं न मुञ्चति' इति। श्येन उवाच—'न वराहं न चापि अन्यं प्राणिनं भक्षयामि। श्येनाः कपोतान् [11]खादन्तीति [12]सनातनी स्थितिरेषा। यदि कपोते महान् तव स्नेहः तर्हि तेन तुलितं स्वमासं मह्यं प्रयच्छ' इति। राजा प्रत्यभाषत। 'महानेष अनुग्रहः, तव वचनं करिष्यामि' इति॥

एवमुक्त्वा स राजा स्वमांसानि [13] उत्कृत्योत्कृत्य तुलया समतोलयत्। राज्ञा आरब्धं [14]दारुणं कर्म श्रुत्वा तस्य अन्तःपुरात् स्त्रियः हाहानिनादेन दिशः [15]बधिरयन्त्यः विनिष्क्रान्ताः। मन्त्रि-भृत्यजनाश्च सर्वतः [16]आक्रन्दितुमारेभिरे। स राजा पार्श्वतः बाहुभ्यां ऊरुभ्यां च मांसानि संछिद्य तुलां अपूरयत्। तथापि तन्मासं कपोतेन तुल्यं न बभूव। यदा निर्मांसो [17]रुधिराप्लुतो राजा अस्थिमात्रावशेषीभूतः तदा तन्मासं कपोतसमानमानं बभूव। श्येनकपोतरूपधारिणौ इन्द्राग्नी च प्रत्यक्षौ भूत्वा राज्ञः औदार्यं प्रशशंसतुः। तत्क्षणमेव राजा मृत्युमवाप। तदा स्वर्गे [18]देवदुन्दुभयः [19]नेदुः। दिव्यैः कुसुमैः अभिवृष्टः अमृतेन च [20]अवसिक्तः राजा विमानं अधिष्ठाय स्वर्गं गतः॥

टिप्पणी

शिबिचरितम्

1. श्येनः—ಗಿಡುಗ. 2. अनुस्रियमाणः—ಹಿಂಬಾಲಿಸಲ್ಪಟ್ಟ. 3. आश्वसिहि—ಸುಧಾರಿಸಿಕೋ. 4. मा बिभीहि—ಹೆದರಬೇಡ. 5. सकाशं—ಹತ್ತಿರಕ್ಕೆ. 6. विस्रब्धः—ನಂಬಿಕೆಯುಳ್ಳವನು. 7. तृष्णा—ಬಾಯಾರಿಕೆ. 8. क्षुधा—ಹಸಿವು. 9. तर्पयितुं—ತೃಪ್ತಿಪಡಿಸಲು. 10. उपकल्पयामि—ಒದಗಿಸುತ್ತೇನೆ. 11. खादन्ति—ತಿನ್ನುತ್ತವೆ. 12. सनातनी—ಹಿಂದಿನಿಂದಿರುವ. 13. उत्कृत्योत्कृत्य—ಕಿತ್ತುಕಿತ್ತು. 14. दारुणं—ಭಯಂಕರವಾದ. 15. बधिरयन्त्यः—ಕಿವುಡುಗೊಳಿಸುತ್ತ. 16. आक्रन्दितुं—ಕಿರಿಚಿಕೊಳ್ಳಲು. 17. रुधिराप्लुतः—ರಕ್ತದಿಂದ ನೆನೆದು. 18. दुन्दुभयः—ನಗಾರಿಗಳು. 19. नेदुः—ಧ್ವನಿಗೈದವು. 20. अवसिक्तः—ನೆನೆಸಲ್ಪಟ್ಟು.

वीरवरस्य कथा

अस्ति कस्मिंश्चित् भूभागे शोभावती नाम अर्थवती नगरी। तस्यां च शूद्रको नाम कश्चित् [1]प्राज्यविक्रमः नृपतिः बभूव। कदाचित् तं महीपालं प्रियशूरं मालवेभ्यः कश्चित् वीरवरो नाम द्विजः समुपययौ। तस्य धर्मवती नाम भार्या, सत्ववरो नाम सुतः वीरवती नाम कन्या च इति त्रयं गृहपरिच्छदः[2]। तावन्मात्रपरिवारो वीरवरः तस्माद्राज्ञः प्रत्यहं [3]दीनारशतपञ्चकं वृत्तये[4] प्रार्थयामास। शूद्रकः अपि वीक्ष्य तं आकारसूचितोदारपौरुषं यथेप्सितं तस्मै ददौ। 'अल्पे परिकरे अपि अयं इयद्भिः दीनारैः किं करोति' इति जिज्ञासमानः राजा तस्य पृष्ठतः प्रच्छन्नान् चारान् स्थापयामास। वीरवरः प्रातः भूपस्य दर्शनं कृत्वा, तस्य द्वारि आमध्याह्नं स्थित्वा, स्ववृत्तिलब्धानां दीनाराणां मध्यात् शतं प्रत्यहं स्वभार्यायाः हस्ते भोजनार्थं प्रादात्। एकेन शतेन वस्त्राङ्गरागताम्बूलं क्रीणाति स्म। शतेन विष्णोः शिवस्य च पूजां व्यधात्। शतद्वयं दीनेभ्यः ददौ। एवं पञ्चापि शतानि नित्यं विभेजे। ततो अग्निकार्यादि कृत्वा भुक्त्वा च राजद्वारं अगच्छत्। एकाकी च निशि पाणौ [5]करवालं दधत् सिंहद्वारे अतिष्ठत्॥

एतां तस्य नित्यचर्यां चारमुखात् श्रुत्वा शूद्रकः अत्यर्थं तुतोष। तस्य [6]अनुमार्गगान् चारान् निवारयामास। तं च विशेषपूजार्हं अमन्यत। यातेषु दिवसेषु मेघे दिवानिशं प्रवर्षति सति वीरवरः सिंहद्वारे तथैव अचलः आसीत्। तं तथा दिवा दृष्ट्वा राजा तस्य स्थितिं जिज्ञासुः पुनः निशि सौधस्य अग्रं आरुरोह। ततो जगाद च 'को नु सिंहद्वारे स्थितः अत्र' इति। 'देव, अहं स्थितः अत्र' इति वीरवरः प्रत्युवाच। '[7]दृढसत्वः अयं वीरवरः मयि परां भक्तिं आस्थितः। तदेष मया महत्पदं प्रापणीयः' इति शूद्रकः अचिन्तयत्। अन्येद्युश्च तमसा सर्वासु दिक्षु मलिनीकृतासु राजा तथैव पप्रच्छ। वीरवरश्च 'अहं स्थितः' इति पुनः प्रत्युवाच।

तस्य धैर्यं दृष्ट्वा यावत् राजा विस्मयते तावत् दूरे विषादविकलायाः रुदत्याः स्त्रियाः रोदनं शुश्रुवे। 'कैषा अबला निशि एकाकिनी रोदिति' इति जिज्ञासमानः जातकरुणश्च राजा अधः स्थितं वीरवरं आदिदेश। 'भो वीरवर, शृणु, एषा काऽपि स्त्री दूरे रोदिति, काऽसौ? किमर्थं च रोदिति? तद्गत्वा त्वया निरूपणीयम्' इति। 'तथा' इत्युक्त्वा वीरवरः [8]निबद्धासिः मेघान्धकारं अगणयित्वा एकाकी एव प्रस्थितः। तादृश्यां रात्रौ प्रस्थितं एकाकिनं तं दृष्ट्वा राजापि करुणाकौतुकाविष्टः प्रासादात् अवतीर्य गृहीतासिः तस्य पृष्ठतः [9]अनुपलक्षितः प्रतस्थे। रुदितमनुसरन् गत्वा वीरवरः नगराद्बहिः सरः प्राप्य तत्र 'हा शूर, हा कृपालो, हा त्यागिन्, त्वया विरहिता अहं कथं [10]वत्स्यामि' इति शोचन्तीं एकां स्त्रियं ददर्श। साश्चर्यः वीरवरः तां 'का त्वम्? किं रोदिषि' इत्यपृच्छत्। सा अभ्यधात्। 'भो, वीरवर, मां वसुधां [11]जानीहि। अधुना धार्मिकः शूद्रको मम पतिः। इतः आरभ्य तृतीये दिने सः राजा प्रजानां अपुण्यैः [12]पञ्चत्वं यास्यति। तादृशं अन्यं नृपं कुतः पतिं प्राप्स्यामि इत्यतः अहं शोचामि' इति। व्यथितो वीरवरः अब्रवीत्। 'अप्यस्ति कश्चिदुपायः येन अस्य जगन्मणेः मृत्युः परिहृतो भवेत्?' इति। सा देवी जगाद। 'अस्ति एकः उपायः; भवानेव तं कर्तुं समर्थः' इति। ततः वीरवरः अवदत्। [13]'द्रुतं वद तमुपायम्; यावत् आशु साधयामि, अन्यथा मम प्राणैः कः अर्थः?' इति। देवी वसुधा बभाषे। 'वीरवर, त्वत्समः स्वामिभक्तः अन्यः कोऽस्ति? उपायं शृणु। या एषा देवी चण्डिका राज्ञा कृतप्रतिष्ठा राजकुलस्य अन्तिके वर्तते तस्यै स्वपुत्रं सत्ववरं यदि [14]उपहारीकरिष्यसि तदा एषः राजा मृत्योः वशं न गमिष्यति अन्यद्वर्षशतं च जीविष्यति' इति। वीरवरः तद्वचो निशम्य उवाच 'यामि देवि, करोमि एतदधुनैव' इति। ततः 'भद्रं ते भूयात्' इत्युक्त्वा वसुधा [15]तिरोदधे॥

एतं वृत्तान्तं गूढस्थितः नृपः अशृणोत्। ततो वीरवरः गूढेन राज्ञा शूद्रकेण अनुगम्यमानः स्वगृहं ययौ। तत्र पत्नीं प्रबोध्य देव्या यदुक्तं तत्सर्वं तस्यै निवेदितवान्। सा उवाच। 'नाथ, [16]वृत्तिप्रदस्य प्रभोः शुभं कार्यम्। तस्मात् सुतं प्रबोध्य

तस्मै एतत् कथयितुमर्हसि ' इति । सुप्तं सत्ववरं प्रबोध्य सर्वं वृत्तान्तं तस्मै आख्याय वीरवरः अब्रवीत् । 'त्वयि देव्याः उपहारे कृते सति राजा जीवति नो चेत् तृतीये [17] अहनि विपद्यते ' इति ' एतत् श्रुत्वा स बालः स्वं नाम यथार्थं दर्शयन् अव्याकुलचित्तः पितरं व्याजहार । 'तात, मम प्राणैः राजा जीवति चेत् अहं कृतार्थः स्याम् । भुक्तस्य तदन्नस्य मया [18] निष्कृतिः दत्ता स्यात् । तत्किं विलम्बसे? भगवत्याः सन्निधौ मां नीत्वा उपहारीकुरु । मृतेन मया प्रभोः कुशलं अस्तु ' । एवं सत्ववरेण प्रोक्तः वीरवरः उवाच । 'साधु, पुत्र, साधु, सत्यं मम पुत्रः भवितुं अर्हसि ' इति ।

वीरवरं अन्वागतः राजा एतत्सर्वं बहिः स्थितः श्रुत्वा सविस्मयं अचिन्तयत् । 'अहो सर्वेषां एषां समं सत्वम् ' इति । ततो वीरवरः पुत्रं [19] स्कन्धे कृत्वा भार्यया धर्मवत्या, सुतया वीरवत्या च अनुगम्यमानः रात्रौ चण्डिकागृहं प्राविशत् । राजा शूद्रकः अपि छन्नः तत्पृष्ठतः जगाम । पित्रा स्कन्धात् अवतारितः सः सत्ववरः देवीं नत्वा सधैर्यं व्यजिज्ञपत् । 'देवि, मम मूर्धोपहारेण राजा शूद्रकः अन्यद्वर्षशतं जीवतु, राज्यं [20]अकण्टकं च करोतु' इति । एवं उक्तवतः सूनोः सत्ववरस्य शिरः छित्वा, वीरवरः देव्यै ददौ । 'साधु, वीरवर, येन त्वया सत्पुत्रं एकं संहरता राज्ञे शूद्रकाय प्राणाः दत्ताः । तस्य तव समः अन्यः स्वामिभक्तः नास्ति' इति तत्क्षणं अन्तरिक्षात् भारती उदगात् ।

वीरवरात्मजा वीरवती हतस्य भ्रातुः मूर्धानं आश्लिष्य विलपन्ती हृदयविदारणेन व्यपद्यत । ततः वीरवरं भार्या अब्रवीत् । 'राज्ञः श्रेयः तावत्कृतम् । तस्मात् इदानीं वदामि । यत्र बालिकापि भ्रातृशोकेन मृता तत्र अपत्यद्वयनाशदह्यमानेन जीवितेन मे किं प्रयोजनम्? अपत्यकलेवराभ्यां [21] सह अहं अनलं प्रविशामि ' इति । एवं वदन्तीं तां वीरवरः उवाच । 'एवं कुरुष्व मनस्विनि, अपत्यनाशविरसे जीविते का प्रीतिः? किं मयैव आत्मा देव्यै नोपहारीकृतः इति तव मनसि मा भूत् । प्रतीक्षस्व यावत् ते चितां रचयामि ' इत्युक्त्वा [22]दारुभिः चितां रचयित्वा अपत्यशवद्वयं तस्यां स्थापयित्वा प्रज्वलयामास । ततः धर्मपत्नी पत्युः पादयोः

पतित्वा देवीं प्रणम्य तां विज्ञापयामास । 'अयमेव आर्यपुत्रः जन्मान्तरे मम पतिः भूयात्' इति । इत्युदीर्य सा साध्वी ज्वालाकलापजटिले तस्मिन् चितानले आत्मानं चिक्षेप । ततो वीरवरः चिन्तयामास । 'मया राजकार्यं निष्पादितम् । अहं प्रभोः [23]आनृण्यं गतः । सकलं कुटुम्बकं प्रभोः कृते व्ययीकृत्य एकस्य मम जीवितेन प्रयोजनं किम् । तदात्मोपहारेण अम्बिकां किं न प्रीणयामि ?' इति आलोच्य सः देवीं अस्तौत् ॥

"जय कालि, जय कपालिनि, जय [24]कङ्कालिनि, शिवे नमस्तेऽस्तु ।
शूद्रकनृपतेरधुना प्रसीद मन्मस्तकोपहारेण ॥"

इति देवीं स्तुत्वा वीरवरः [25]स्वोत्तमाङ्गं अच्छिनत् ।

एतदालोक्य छन्नः शूद्रकः सदुःखः साश्चर्यश्च व्यचिन्तयत् । 'अनेन साधुना मत्कृते अन्यत्र अश्रुतं अदृष्टं किमपि दुष्करं कर्म कृतम् । विविधाश्चर्यमये अस्मिन् संसारे ईदृशो धीरो नरः कुतः सम्भवेत् यः प्रभोः कृते [26]स्वासून् निश्शङ्कं एवं अर्पयति ? अस्य उपकारस्य सदृशं यदि अहं न कुर्यां तर्हि का मे प्रभुता किं च मे पशोरिव जडजीवितेन ?' इति । एवं संचिन्त्य कोशात् खड्गं आकृष्य शूद्रकः देवीं उपेत्य व्यजिज्ञपत् । 'भगवति, सदैव त्वां [27]अनुप्रपन्ने मयि मूर्धोपहारस्वीकारेण अनुग्रहं कुरु । अयं विप्रो वीरवरः यथार्थनामा मदर्थे त्यक्तजीवितः सकुटुम्बः पुनः उत्तिष्ठतु' इति । एवं उदीर्य राजा यावदसिना शिरः छेत्तुं प्रावर्तत तावदशरीरिणी वागुदचरत् 'मा साहसं कृथाः । सत्वेनानेन अहं तुष्टास्मि । वीरवरः अपत्यदारसहितः प्रत्युज्जीवतु' इति ।

ततो वीरवरः अपत्यदारसहितः उदतिष्ठत् । तदद्भुतं विलोक्य राजा पुनः प्रच्छन्नः अभवत् । वीरवरोऽपि [28]सुप्तोत्थितमिव आत्मानं दृष्ट्वा पुत्रदारं च पुनः सजीवं वीक्ष्य विभ्रान्तमनसः सर्वान् पप्रच्छ । भस्मीभूताः यूयं कथं पुनर्जीवन्तः उत्थिताः ? मया अपि शिरः छिन्नम् ; तथापि जीवाम्येव । इदं किं नु स्यात् ।? स्वप्नो नु ? माया नु ? [29]उताहो मतिविभ्रमोऽयम् ? [29]आहोस्वित् देव्यनुग्रहः ?' इति । सः दारापत्यैः ऊचे । 'यत् वयं जीवामः अयं देव्यनुग्रह एव । न स्वप्नः न चापि विभ्रमः' इति । ततः वीरवरः अम्बिकां नत्वा गृहं ययौ । तत्र पुत्रं पुत्रिकां भार्यां च

स्थापयित्वा पुनः सिंहद्वारं आयातः। शूद्रकः अपि केनापि अलक्षितः प्रासादपृष्ठं आरुरोह। 'कः अत्र द्वारि स्थितः?' इति च व्याहरत्। ततो वीरवरः अवदत्। 'अहं अत्र तिष्ठामि। देवादेशात् स्त्रियं द्रष्टुं यावद्गच्छामि तावत् सा राक्षसी मां दृष्ट्वैव नष्टा' इति। राजा विस्मितः चिन्तयामास। 'अहो मनस्विनः चित्तस्य समुद्रस्येव गम्भीरता। यदयं कृत्वापि अनन्यसाधारणं [30]अवदातं कर्म प्रकाशं न ब्रूते' इति। प्रातः स भूपतिः मन्त्रिभ्यः रात्रिगतं वृत्तान्तं अकथयत्। तेन च ते साश्चर्याः अभवन्। तस्मै वीरवराय कर्णाटयुतं लाटदेशराज्यं राजा ददौ। ततो वीरवरशूद्रकौ तुल्यविभवौ अन्योन्योपकारिणौ चिरं राज्यसुखं अन्वभवताम्॥

टिप्पणी

वीरवरस्य कथा

1. प्राज्यविक्रमः—ವಿಶೇಷಪರಾಕ್ರಮಿಯಾದ. 2. परिच्छदः—ಪರಿವಾರ. 3. दीनारम्—ಸುವರ್ಣ ನಾಣ್ಯ. 4. वृत्तये—ಜೀವನಕ್ಕಾಗಿ. 5. करवालम्—ಕತ್ತಿಯನ್ನು. 6. अनुमार्गगान्—ಹಿಂಬಾಲಿಸಿ ಹೋಗುವ. 7. दृढसत्वः—ಹೆಚ್ಚು ಬಲವುಳ್ಳ. 8. निबद्धासिः—ಕತ್ತಿಯನ್ನು ಸೊಂಟಕ್ಕೆ ಸಿಕ್ಕಿಸಿಕೊಂಡು. 9. अनुपलक्षितः—ಕಾಣದಹಾಗೆ. 10. वत्स्यामि—ಜೀವಿಸಲಿ. 11. जानीहि—ತಿಳಿದುಕೊ. 12. पञ्चत्वम्—ಮರಣವನ್ನು. 13. द्रुतम्—ಜಾಗ್ರತೆಯಾಗಿ (ಅವ್ಯಯಂ). 14. उपहारः—ಬಲಿ. 15. तिरोदधे—ಮರೆಯಾದಳು. 16. वृत्तिप्रदः—ಜೀವನವನ್ನು ಕೊಡುವವ. 17. अहनि—ದಿವಸದಲ್ಲಿ. 18. निष्कृतिः—ಪ್ರತೀಕಾರವು. 19. स्कन्धे—ಹೆಗಲಿನ ಮೇಲೆ. 20. अकण्टकम्—ಶತ್ರುರಹಿತವಾಗಿ. 21. कलेवरः—ಜೀವವಿಲ್ಲದ ಶರೀರ. 22. दारुभिः—ಕಟ್ಟಿಗೆಗಳಿಂದ. 23. आनृण्यंगतः—ಋಣರಹಿತನಾದೆ. 24. कङ्कालिनि—ಮೂಳೆಗಳನ್ನು ಧರಿಸಿರುವವಳೇ? 25. उत्तमाङ्गम्—ತಲೆಯನ್ನು. 26. स्वासून्—ತನ್ನ ಪ್ರಾಣಗಳನ್ನು. 27. अनुप्रपन्ने—ಮರೆಹೊಕ್ಕಿರುವ. 28. सुप्तोत्थितमिव—ಮಲಗಿ ಎದ್ದವನಂತೆ. 29. उताहो, आहोस्वित्—ಅಥವಾ. 30. अवदातम्—ಪುಣ್ಯಕರವಾದ.

परिहासशीलः चोरः

बभूव काञ्चीनाम राजधानी। तस्यां सुप्रतापो नाम राजासीत्। तत्र एकदा कस्यापि धनिकस्य धनं चोरयितुं चत्वारः चोराः समागच्छन्। सन्धिं कृत्वा धनिकस्य गृहं प्रविश्य धनं चोरयन्तः राजपुरुषैः प्राप्ताश्च। राजपुरुषाः तान् [1]शृङ्खलेन बद्ध्वा राजसमीपं नीत्वा सर्वं वृत्तान्तं निवेदयामासुः। कुपितो राजा घातुकपुरुषान् [2]आहूय, 'एतान् चतुरः चोरान् नगरात् बहिः नीत्वा, शूलं आरोपयत' इति आदिदेश। राजाज्ञया घातुकपुरुषैः त्रयः चोराः शूलं आरोप्य हताः। तदा चतुर्थेन चिन्तितम्—

'व्याधिना पीड्यमानोऽपि [3]मार्यमाणोऽपि भूभुजा।
[4]प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः॥

तस्मात् मया प्रतीकारः कर्तव्यः' इति।

ततः चोरः उवाच—"रे रे घातुकपुरुषाः, युष्माभिः त्रयः चोराः हता एव। इदानीं राजाग्रे मद्वचनं [5]श्रावयित्वा मां मारयत। यतः अहं एकां महतीं विद्यां जानामि। मयि मृते सा अस्तं यास्यति। राजा तु तां [6]गृहीत्वा मां मारयतु। तेन सा विद्या [7]मर्त्यलोके तिष्ठेत्"। इति।

घातुकाः ऊचुः—"रे चोर, पुरुषाधम, वधस्थानं [8]आनीतोऽसि। किं अतोऽपि जीवितुं इच्छसि? कां विद्यां जानासि? कथं वा तव अधमस्य विद्या भूपालेन ग्रहीतव्या"। इति।

चोरः उवाच—'रे घातुकाः, यूयं राज्ञे निवेदयत। यदि राजा [9]शृणोति तदा अवश्यं तेन महतीयं विद्या गृह्यते। किं च विद्यावार्ताकथकेभ्यः[10] युष्मभ्यमपि प्रभुणा प्रसादः क्रियते' इति। ततः तस्य चोरस्य वचनं घातुकाः राज्ञे निवेदयामासुः।

राजा च [11]कौतुकमाकर्ण्य चोरं आहूय पप्रच्छ।

राजा—'रे चोर, कां विद्यां जानासि?'

चोरः—'देव, [12]सुवर्णकृषिं जानामि'।

राजा—'का [13] परिपाटी'।

चोरः—'देव [14]सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमौ [15]उप्यन्ते चेत् मासमात्रेण सर्षपसदृशाः एव कन्दल्यः[16] भवन्ति। देवः प्रत्यक्षं पश्यतु'।

राजा—'चोर, सत्यमेतत् ?'

चोरः—'देवस्य पुरतः कस्य असत्यभाषणे शक्तिः? यदि मम वचनं [17]व्यभिचरति तदा मासान्ते ममापि अन्तो भविष्यति। तदाऽपि देवः [18]शास्तिकरणे प्रसादकरणे च प्रभुरेव'।

राजा—[19]'भद्रम्; [20]वप सुवर्णम्'।

ततः चोरः सुवर्णं दाहयित्वा सर्षपमात्राणि बीजानि कृत्वा नृपतेः क्रीडासरसः तटे भूपरिष्कारं कृत्वा बभाषे।

चोरः—'देव, क्षेत्रबीजे सम्पन्ने, [21]वप्ता कश्चित् दीयताम्'।

राजा—'त्वमेव किं न वपसि?'

चोरः—'यदि सुवर्णवपने ममैव अधिकारः भवति तदा किमहं दुःखी भवामि? किं तु सुवर्णवपने चोरस्य अधिकारो नास्ति। येन कदापि किमपि न चोरितं सः एव वप्तुमर्हति। अतः देव एव किं न वपति?"

राजा—'मया [22]चारणेभ्यो दातुं तातचरणानां धनं चोरितम्'।

चोरः—'तर्हि मन्त्रिणः वपन्तु'।

मन्त्रिणः—'वयं राजोपजीविनः, कथं [23]अस्तेयिनो भवामः'?

चोरः—'तर्हि धर्माधिकारी वपतु'।

धर्माध्यक्षः—'मयाऽपि बाल्यदशायां मातुर्मोदकाः चोरिताः'।

चोरः—'यूयं सर्वेऽपि चोराः, कथं अहमेक एव मारणीयोऽस्मि?'

चोरस्य तद्वचनं श्रुत्वा सभासदः सर्वे [24]जहसुः। राजाऽपि हास्यरसापनीतक्रोधः विहस्य आह।

राजा—'रे, चोर, न मारणीयोऽसि। हे मन्त्रिणः, कुबुद्धिरपि बुद्धिमानयं चोरः। हास्यरसप्रवीणश्च। ततो ममैव सन्निधाने तिष्ठतु। [25]प्रस्तावे मां हासयतु मोदयतु च'।

ततः स चोरः राज्ञः सन्निधाने स्थापितः॥

टिप्पणी

परिहासशीलः चोरः

1. शृंखलम्—ಸರಪಳಿ. 2. आहूय—ಕರೆದು. 3. मार्यमाणः—ಕೊಲ್ಲಲ್ಪಡುವವನು. 4. प्रत्यायाति—ಹಿಂತಿರುಗಿ ಬರುವನು. 5. श्रावयित्वा—ತಿಳಿಸಿ. 6. गृहीत्वा—ತಿಳಿದುಕೊಂಡು. 7. मर्त्यलोकः—ಭೂಲೋಕ. 8. आनीतोऽसि—ಕರೆತರಲ್ಪಟ್ಟಿದ್ದೀಯೆ. 9. शृणोति—ಕೇಳುವನು. 10. कथकाः—ಹೇಳುವವರು. 11. कौतुकम्—ಆಶ್ಚರ್ಯಕರವಾದ ವೃತ್ತಾಂತ. 12. सुवर्णकृषिः—ಚಿನ್ನದ ವ್ಯವಸಾಯ. 13. परिपाटी—ಕ್ರಮ. 14. सर्षपः—ಸಾಸಿವೆ. 15. उप्यन्ते चेत्—ಬಿತ್ತಲ್ಪಟ್ಟರೆ. 16. कन्दल्यः—ಮೊಳಕೆಗಳು. 17. व्यभिचरति—ವ್ಯತ್ಯಾಸಗೊಳ್ಳುತ್ತದೆ. 18. शास्तिकरणे—ಶಿಕ್ಷೆಮಾಡಲು. 19. भद्रं—ಒಳ್ಳೆಯದು. 20. वप—ಬಿತ್ತು. 21. वप्ता—ಬಿತ್ತುವವನು. 22. चारणाः—ಹೊಗಳುಭಂಟರು. 23. अस्तेयिनः—ಕದಿಯದವರು. 24. जहसुः—ನಕ್ಕರು. 25. प्रस्तावः—ಮಾತಿನ ಸಂದರ್ಭ.

WD 2679—GBPM—3,000—10-1-49.